# संस्कृत वार्ता:

दिनाङ्क : 12.10.2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- समुद्र-तटीय-क्षेत्रेषु जलान्तर्गत-सुरक्षा-सङ्कट-निवारणार्थम् 'आई.एन.एस. मङ्ग्रोल' इति स्वदेशी-समर-पोतः भारतीय-नौसेनायां राष्ट्राय समर्पितः।
- प्रत्येक-भारतीय-नागरिके न्याय-प्राप्तये सर्वोच्च-न्यायालयस्य द्वाराणि सर्वदा अपावृतानि एव तिष्ठन्ति इति मुख्य-न्यायाधीशेन सूर्यकान्तेन उद्घोषितम्।
- नवदेहल्याः 'जन्तर-मन्तर'-स्थलम् अधुना विरोध-प्रदर्शन-स्थानं न स्थास्यति; देहली-आरक्षि-अधिकाधिकारिभिः जन-प्रदर्शनेभ्यः त्रीणि नूतनानि स्थानानि परिगणितानि।
- चिकित्सा-सुविधासु मूल्य-पारदर्शितां वर्धयितुं केन्द्रेण सर्वैः राज्यैः केन्द्रशासित-प्रदेशैश्च रुग्णालय-प्रदेयानां शुल्कानां सुस्पष्टं पट्टिका-प्रदर्शनं निर्वोढुम् समादिष्टम्।
- अपि च, समष्टि-अर्थशास्त्रस्य स्थिरीकरण-प्रतिमानानां विकास-हेतोः अमरीकी-विद्वद्भ्यां रोबर्ट-ई.-हॉल-माइकल-वूडफोर्ड-वर्याभ्यां प्रतिष्ठितः अर्थशास्त्र-नोबेल-पुरस्कारः अलङ्कृतः।

-----------------------------------------------

<u>नवरात्र</u>

शारदीय-नवरात्रोत्सवस्य द्वितीये अह्नि प्रधानमन्त्री श्रीनरेन्द्रमोदी देशवासिभ्यः हार्दान् शुभाशयान् व्याहृतवान्। सामाजिकान्तर्जालीयपटले स्व-सन्देशं प्रसारयन् प्रधानमन्त्री प्रोक्तवान् यत् नवरात्रस्य द्वितीयं दिनं तपसः, त्यागस्य, दृढ-सङ्कल्पस्य च प्रतीक-भूतायाः भगवत्याः ब्रह्मचारिण्याः उपासनायै समर्पितम् अस्ति। प्रधानमन्त्रिणा प्रार्थना विहिता यत् मातापद्मधारिणी देवी ब्रह्मचारिणी सर्वान् अपि जनान् शौर्येण, धैर्येण, आत्म-संयमेन च अनुगृह्णातु इति।

-----------------------------------------------

## आई.एन.एस. मङ्ग्रोल

कोच्ची-नगरस्थेन 'कोचीन-शिपयार्ड'-संस्थया निर्मितस्य तृतीयस्य जलमग्न-शत्रु-नाशक-पोतस्य आई.एन.एस. मङ्ग्रोल इत्यस्य अद्य मुम्बय्यां नौसेनायाम् औपचारिकः समावेशः जातः। स्वदेशी-प्रौद्योगिक्या निर्मितस्य अस्य समर-पोतस्य समावेशेन तटीय-अगाध-जलेषु जलान्तर्गत-शत्रूणां संधानस्य, तेषां प्रतीकारस्य च नौसेनायाः सामर्थ्यम् अभूतपूर्वं सुदृढं भविष्यति। मुम्बई-नौकाष्ठाने आयोजितायाः अस्याः नौसेना-दीक्षायाः अध्यक्षतां कुर्वन् पश्चिमी-नौदल-प्रमुखः वाइस-एडमिरल-संजय-वत्सयानः अभासत यत् चतुस्त्रिंशदधिक-द्विसहस्रतमं वर्षं यावत् भारतीय-नौसेनायाः षष्टि-प्रतिशतं जलायनानि दश-वर्षेभ्यः अपि नूतनानि स्थास्यन्ति।

------------------------------------------------

## सर्वोच्च-न्यायालय

भारतस्य मुख्य-न्यायाधीशेन न्यायमूर्ति-सूर्यकान्तेन प्रोक्तं यत् सर्वोच्च-न्यायालयस्य द्वाराणि सर्वेभ्यः नागरिकेभ्यः उद्घाटितानि सन्ति। कस्यापि सामान्य-नागरिकस्य वा जनप्रतिनिधेः वा वा याचिका सर्वदैव स्वागतीक्रियते। मानवाधिकार-आयोगस्य त्रयस्त्रिंशत्तमं स्थापना-पर्व सम्बोधयन् मुख्य-न्यायाधीशः प्रोक्तवान् यत् भारत-संविधानं प्रत्येकं जनस्य गरिमां, समतां, स्वातन्त्र्यं, न्यायं च परिरक्षितुं दृढ-सङ्कल्पम् अस्ति। सहैव ह्यः प्रेषितस्य पत्रस्य रात्रावेव उत्तरं प्रेषयित्वा असामर्थ्यस्य कारणानि प्रतिपादितानि।

------------------------------------------------

## राष्ट्र-सेविका

राजमातुः विजयाराजे-सिन्धिया-वर्यायाः जन्म-जयन्त्याम् अद्य प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना तां प्रति भावपूर्णा श्रद्धाञ्जलिः समर्पितः। प्रधानमन्त्री अवदत् यत् राष्ट्र-सेवायाम् अस्याः त्यागः समर्पणञ्च सर्वान् सदैव प्रेरयिष्यति। प्रधानमन्त्रिणा प्रोक्तं यत् राजमातुः आदर्श-विचाराः 'विकसित-भारतम्' इति सुदृढ-सङ्कल्पे नव-ऊर्जायाः सञ्चारं करिष्यन्ति।

------------------------------------------------

## दिल्ली - विरोधप्रदर्शनस्थलानि

दिल्ल्यारक्षिबलेन विरोधप्रदर्शनानाम् आयोजनाय त्रीणि नूतनानि स्थानानि निर्धारितानि। एतेषु रामलीलामैदान, बुराडीमैदान चेति तथा पूर्वदिल्ल्यां स्थितं सीबीडी-मैदान चेत्यादीनि सम्मिलितानि सन्ति। दिल्ल्यारक्षि-आयुक्तेन अनुरागकुमारेण आदेशं प्रसार्य सूचितं यत् जन्तर-मन्तर इति स्थानम् अधुना निर्धारितप्रदर्शनस्थलरूपेण अधिसूचितं नास्ति। नागरिकानां विरोधप्रदर्शनस्य आयोजनस्य अधिकारं सुनिश्चेतुं केन्द्रीयगृह-मन्त्रालयेन उपयुक्तानां वैकल्पिकस्थानानां चयनाय समितिः निर्मिता आसीत्।

---------------------------------------------

## सर्वोच्च-न्यायालय-स्फोटक

दिल्ली-प्रदूषण-विषये सर्वोच्च-न्यायालयस्य मतम् - कठोर-निषेधाज्ञाभ्यः जन-जागरूकता स्वैच्छिक-सहयोगश्च अधिक-फलप्रदौ। मुख्य-न्यायाधीश-सूर्यकान्त-पीठेन धार्मिक-भावनानाम् आदरेण सह सन्तुलित-नियन्त्रणाय, अल्प-हानिकर-स्फोटकानां च विक्रयणाय परामर्शः दत्तः। अग्रिमं वादश्रवणं च अक्टोबर-मासस्य पञ्चदश-दिनाङ्के भविष्यति।

---------------------------------------------

## एनएचआरसी

नवदेहल्यां राष्ट्रिय-मानवाधिकार-आयोगस्य त्रयस्त्रिंशत्तमः स्थापना-दिवसः अद्य सोल्लासं समाचरितंगतः। अस्य अवसरस्य विशेष-समारोहे भाषणं कुर्वन् आयोगस्य अध्यक्षः न्यायमूर्तिः वी. रामसुब्रह्मण्यन्-वर्यः प्रोक्तवान् यत् परिवर्तनशील-कालानुकूलं मानवाधिकार-संस्थाभिः स्व-कार्यप्रणाली सुदृढा करणीया, येन मानव-गरिम्णः स्वातन्त्र्यस्य च रक्षण-सङ्कल्पः पुनर्नवीकृतः भवेत्।

---------------------------------------------

## राहुल-गाँधी

लोकसभायाः विपक्ष-नेता राहुल-गाँधी अद्य अब्रवीत् यत् मुख्य-निर्वाचन-आयुक्त-ज्ञानेश-कुमार-विरुद्धम् 'इण्डिया'-दलैः अद्य उच्चतम-न्यायालये याचिका निवेद्यते। नवदेहल्यां वार्ताहरान् सम्बोधयन् तेन प्रोक्तं यत् मुख्य-न्यायाधीशं पत्रं प्रेषयित्वा निर्वाचन-शुचिता-विषये आशङ्काः व्यक्ताः तथा हि देहल्यां मत-चौर्य-विरोधि-जनप्रवाहस्य निरोधः समालोचितः।

-----------------------------------------------

## अर्थशास्त्र-नोबेल-पुरस्कारः

षड्विंशत्युत्तरद्विसहस्रतमस्य अर्थशास्त्र-नोबेल-पुरस्कारः अमरीकी-विद्द्भ्यां रोबर्ट-हॉल-माइकल-वूडफोर्ड-वर्याभ्यां प्रदानार्थं उद्घोषितः। समष्टि-अर्थशास्त्रस्य प्रतिमानैः आर्थिक-समृद्ध्योः स्थिरीकरणाय राजकोषीय-नीतीनां सुदृढीकरणे तयोः योगदानं समादृतम्।

-----------------------------------------------

## राजनाथसिंहः - आत्मनिर्भरता

रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् विगतेषु कतिपयेषु वर्षेषु प्रशासनेन शस्त्रास्त्र-प्रौद्योगिकी-वस्त्र-उपकरण-प्रशिक्षणादिषु सर्वेषु क्षेत्रेषु आत्मनिर्भरतां तथा आधुनिकीकरणं प्रति विशेषं ध्यानं प्रदत्तम्। नवदिल्ल्यां भारतीयसेनायाः भारतीयखाद्यनिगमस्य च मध्ये सन्धिज्ञापनपत्रे हस्ताक्षरसमये श्रीसिंहः उक्तवान् यत् भारतं सम्प्रति स्वस्य रक्षासम्बद्धानाम् आवश्यकतानां महत्त्वपूर्णम् अंशं स्वदेशे एव निर्माति। सः उक्तवान् यत् यदा प्रशासनं सैनिकेभ्यः उत्तमम् आहारम्, उपयुक्तानि उपकरणानि, गुणवत्तापूर्णं प्रशिक्षणं पर्याप्तसुविधाश्च प्रददाति, तदा तेषां मनोबलं वर्धते।

-----------------------------------------------

## केन्द्रप्रशासनम् - चिकित्सालयेषु शुल्कप्रदर्शनम्

केन्द्रप्रशासनेन सर्वेभ्यः राज्येभ्यः केन्द्रशासित-प्रदेशेभ्यश्च चिकित्सासंस्थाभिः प्रदत्तानां सेवानां सौविध्यानां च शुल्कं प्रमुखतया प्रदर्शनं सुनिश्चेतुम् आग्रहः कृतः। केन्द्रीयस्वास्थ्यसचिवया पुण्यसलिला श्रीवास्तव इत्यनया अस्मिन् विषये सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च मुख्यसचिवेभ्यः पत्रं लिखितम्। स्वास्थ्यसेवाशुल्कनिर्धारणे पारदर्शितायाः महत्त्वं प्रतिपादयन्ती

सा उक्तवती यत् शुल्कानां स्पष्टं प्रदर्शनं रोगिभ्यः तेषां परिवारेभ्यश्च चिकित्सायाः सम्भावित-व्ययं ज्ञातुं, समुचितान् निर्णयान् स्वीकर्तुं तथा चिकित्साव्ययस्य योजनां निर्मातुं साहाय्यं करिष्यति।

-----------------------------------------------

## पर्यावरण-वन-जलवायु-मन्त्री

केन्द्रीय-पर्यावरण-वन-जलवायुपरिवर्तन-मन्त्री भूपेन्द्र-यादवः अद्य प्रोक्तवान् यत् 'विकसित-भारतम् @२०४७' इति राष्ट्रिय-सङ्कल्पस्य सिद्धये आर्थिक-प्रगतेः सहैव पर्यावरण-सुरक्षायाः समन्वयः अत्यन्तं आवश्यकः अस्ति। नवदेहल्यां वन-सेवा अधिकारिणां मध्यावधि-प्रशिक्षण-समारोहमलङ्कुर्वन् मन्त्री देशस्य कानन-संरक्षणे, वन्यप्राणि-सुरक्षायां, प्राकृतिक-न्यासानां पालने च तेषाम् अनिर्वचनीयं समर्पणाभिसन्धानम् अभ्यनन्दत्।

-----------------------------------------------

## भाजपादलस्य काङ्ग्रेसविरुद्धं प्रदर्शनम्

भाजपामहिलामोर्चा इत्यनया अद्य नवदिल्ल्यां विरोधप्रदर्शनम् आयोजितम्। अनया जवाहरलालनेहरू-विश्वविद्यालये छात्राभिः सम्बद्धानां कथितानां यौनदुर्व्यवहार-प्रकरणानाम् आधारेण आन्तरिकमणिपुरस्य काङ्ग्रेस-सांसदस्य डॉ. अङ्गोमचा बिमोल अकोइजाम इत्येतस्य विरुद्धं कार्याचरणं कर्तुं याचना कृता। भाजपादलेन प्रतिपादितं यत् एकादश-छात्राभिः प्रदत्तानां परिवादानां विषये अन्वेषणानन्तरं जवाहरलाल- नेहरूविश्वविद्यालयेन अकोइजाम् इत्येषः अध्यापनपदात् अपसारितः आसीत्।

।। इति वार्ता: ।।